CBSE Class 9 Sanskrit

# प्रतिदर्श

# प्रश्न-पत्रम् -9

## स्वतः मूल्यांकन

समय : होरात्रयम् ] [ पूर्णाङ्काः 90

**निर्देशाः**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) अपठित-अवबोधनम् | – | 10 अङ्काः |
| खण्डः (ख) रचनात्मकं कार्यम् | – | 15 अङ्काः |
| खण्डः (ग) अनुप्रयुक्त-व्याकरणम् | – | 30 अङ्काः |
| खण्डः (घ) पठित-अवबोधनम् | – | 35 अङ्काः |

(ii) सर्वे प्रश्नाः अनिवार्याः।

(iii) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।

(iv) प्रश्न संख्या अवश्यं लेखनीया।

(v) उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्ड : 'क'

**अपठित-अवबोधनम्** **(10 अङ्काः)**

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत—**

महात्मानो बुद्धस्य शिष्यः आनन्दः आसीत्। एकदा सः ग्रीष्मकाले मार्गे गच्छति स्म। सूर्यस्य आतपः तीव्रः आसीत्। सः पिपासाकुलः जलपानार्थम् इतस्ततः पश्यति स्म। किंचिद् दूरे सः एकाम् कन्याम् अपश्यत्। सा कूपात् जलं निष्कासयति स्म। आनन्दः तस्याः समीपम् अगच्छत् जलं च अयाचत। मातङ्गी प्रत्यवदत् "नाहं जलं पाययितुं शक्नोमि यतः अहम् अपवित्रा अस्मि।" आनन्दोऽवदत्। नाहं पवित्र-"अपवित्रकुलो गणयामि। यतः सर्वे जीवाः ईश्वरस्य अंशभूताः भवन्ति।" मातङ्गी प्रसन्नमनसा स्वकीयघटात् जलम् अस्रावयत् आनन्दः यथेष्टं जलं पीतवान्। मातङ्गी बुद्धस्य समीपम् अगच्छत्। भगवान् बुद्धः तस्यै अमृततुल्यवचनैः उपदेशम् अयच्छत्। मातङ्गी ज्ञानं लब्ध्वा अभूतपूर्वां शान्तिं प्राप्तवती। नूनं कर्मणा एव नरः उच्चः नीचः वा भवति।

**प्रश्नाः**

**I. एकपदेन उत्तरत—** **1 + 1 = 2**

(i) महात्मनः बुद्धस्य शिष्यस्य नाम किम् आसीत्?

(ii) शिष्यः किमर्थम् इतस्ततः पश्यति स्म?

**II. पूर्णवाक्येन उत्तरत—** **1 + 1 = 2**

(i) आनन्दः कुत्र अगच्छत् किं च अयाचत?

(ii) मातङ्गी ज्ञानं लब्ध्वा किं प्राप्तवती?

**III. निर्देशानुसारम् उत्तरत—** **1 + 1 + 1 + 1 = 4**

(i) 'अपश्यत् इति क्रियापदस्य किं कर्तृपदम् अत्र प्रयुक्तम्?

(अ) आनन्दः (ब) मातङ्गी (स) बुद्धः (द) सूर्यः

LearnCBSE.in

(ii) 'भानो:' इति अर्थे किं पदम् अत्र प्रयुक्तम्?

(अ) मार्गे (ब) दूरे (स) बुद्धस्य (द) सूर्यस्य

(iii) 'नूनं कर्मणा एव नर: उच्च: नीच: वा भवति'

अत्र 'नर:' पदस्य क्रियापदं किम्?

(अ) कर्मणा (ब) भवति (स) उच्च: (द) नीच:

(iv) 'आनन्द: तस्या: समीपम् अगच्छत्' अत्र 'तस्या:' पदं कस्यै प्रयुक्तम्?

(अ) कन्यायै (ब) शिष्याय (स) बुद्धाय (द) नराय

**IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत।** **2**

## खण्ड: (ख)

### रचनात्मकं कार्यम् (15 अङ्का:)

**2. भवती सरोजिनी। भवत्या: वर्गेण अनाथबालकै: सह प्रतियोगितायां पराजय: अनुभूत:। आत्मानुभवान् वर्णयन्त्या भवत्या मातरं प्रति लिखितं पत्रं मञ्जूषापद-सहायतया पूरयित्वा उत्तरपुस्तिकायां लिखत—** ½+½+½+½+½+½+½+½+½+½ = 5

नूतनविद्यापीठम्

कर्णाटकत:

पूज्ये (i)

सादरं चरणस्पर्श

अत्र खलु (ii) .................. कुशलम् मन्ये तत्रापि सर्वे (iii) ..................। मात: ! अस्माकं विद्यालयस्य समीपे एक: अन्य: विद्यालय: अस्ति। यत्र (iv).................. दीना: असहाया: छात्रा: एव पठन्ति। अस्माकं प्राचार्य: तस्य विद्यालयस्य दशमकक्षाया: छात्रै: (v)......... गीता-अन्त्याक्षरी प्रतियोगिताम् (vi).................. । जानाति भवति, वयं सर्वे तस्यां (vii) ...... जाता:। तेषां (viii)........ तु अभूतपूर्वम् आसीत्। नूनं दर्प: नाशयति, (ix)......... सर्वत्र विजयते।

पितृचरणयो: प्रणामा:

भवत्या: प्रिया सुता

(x) ..................

**मञ्जूषा**

| सर्वे, पराजिता:, सरोजिनी, मात:, कुशलिन:, आयोजितवान्, सह, सर्वगतम्, प्रदर्शनं, श्रम:। |
|---|

**3. मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत।** 2 + 2 + 2 + 2 + 2 = 10



LearnCBSE.in

**मञ्जूषा**

| |
|---|
| मेघाः, नदी, महिलाः, हर्षिताः, शोभनम्, पुरुषाः, मयूरः, कृषकाः, भवन्ति, आगच्छन्ति, बालाः, पुष्पाणि, उड्डयते, भविष्यति। |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया ''मम विद्यालयस्य क्रीडादिवसः'' इति विषयम् आधृत्य पञ्च वाक्यानि संस्कृतेन लिखत।**

**2 + 2 + 2 + 2 + 2 = 10**

**मञ्जूषा**

| |
|---|
| क्रीड़ादिवसः, प्रसन्नाः, आसन्, अनेकक्रीड़ाः, धावने, क्रीड़ाप्रतियोगितासु, प्रथमस्थानम्, क्रीड़ाक्षेत्रे, विद्यालस्य, पुरस्कारवितरणम्, गर्वम्, अनुभवामि, कृतवन्तः, प्रधानाचार्यः |

## खण्डः (ग)

### अनुप्रयुक्त-व्याकरणम् (30 अङ्काः)

**4. (अ) अधोलिखितानां प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत—** **1 + 1 = 2**

(i) 'ह्' वर्णस्य किम् उच्चारणस्थानम् अस्ति?

(ii) 'स्मरति' इति पदे दन्त्यः वर्णः अस्ति?

**(आ) रिक्तस्थानं पूरयत—** **1 + 1 = 2**

(iii) नक्षत्र = न् + अ + क् + .................... अ + त् + र् + अ

(iv) अ + ष्+ ट् + आ + व् + अ + क् + र् + अः = ....................

**5. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा सन्धिं सन्धिच्छेदं वा कुरुत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) विद्यालये अद्यावकाशः नास्ति।

(अ) न + अस्ति (ब) ना + स्ति

(स) ना + अस्ति (द) न् + अस्ति

(ii) जगदीशः कम् न रक्षति?

(अ) जगत् + इशः (ब) जगत् + ईशः

(स) जगद् + ईशः (द) जगदी + शः

(iii) बालः तच्चित्रं पश्यति।

(अ) तत् + चित्रम् (ब) तद् + चित्रं

(स) तच्च + इत्रम् (द) तच् + चित्रं

(iv) विवेकः अद्यैव उद्यानं गमिष्यति।

(अ) अद्य + इव (ब) अद्य + ऐव (स) अद्य + एव (द) अद्यै + व

(v) ग्रीष्म + ऋतौ जनाः पर्वतेषु गच्छन्ति।

(अ) ग्रीष्मरतौ (ब) ग्रीष्मर्तौ (स) ग्रीष्मृतौ (द) ग्रीष्म ऋतौ

**6. प्रदत्तविकल्पेभ्यः उचितम् उत्तरम् चित्वा रिक्तस्थानानि पूरयत—** **1 + 1 + 1 + 1 + 1 = 5**

(i) बालकाः ........................ गृहम् आगच्छन्ति।

(अ) पाठशालया (ब) पाठशालायाम् (स) पाठशालायाः (द) पाठशालाम्

(ii) त्वम् .................... धनम् यच्छ।

(अ) साधवे (ब) साधुम् (स) साधूनाम् (द) साधोः

(iii) .................... विद्यालये मम मित्रम् पठति।

(अ) अस्य (ब) अनेन (स) अस्मिन् (द) अस्याः

(iv) वृक्षेषु मधुराणि .................... उद्भवन्ति।

(अ) फले (ब) फलम् (स) फलानि (द) फलानाम्

LearnCBSE.in

(v) उर्वशी ...................... जलम् आनयति।

(अ) मात्रा (ब) मात्रे (स) मातु: (द) मातरम्

**7. प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा रिक्तस्थानानि पूरयत—** 1 + 1 + 1 + 1 + 1 = 5

(i) श्व: विद्यालये वनमहोत्सव: .......................... ।

(अ) भविष्यति (ब) भविष्यत: (स) भविष्यन्ति (द) भविष्यामि

(ii) स: गुरुम् प्रश्नम् ...................... ।

(अ) प्रक्ष्यति (ब) प्रक्ष्यसि (स) प्रक्ष्यामि (द) प्रक्ष्यन्ति

(iii) किम् त्वम् पठितुम् ........................ ।

(अ) इच्छति (ब) इच्छत: (स) इच्छसि (द) इच्छामि

(iv) भोज: एक: प्रतापी राजा .................... ।

(अ) आसीत् (ब) आस्ताम् (स) आसन् (द) आसी:

(v) मोहन: मित्रेण सह आपणम् ................ ।

(अ) अगच्छ: (ब) अगच्छतम् (स) अगच्छत् (द) अगच्छम्

**8. कोष्ठके प्रदत्तानां शब्दानाम् उचितेन रूपेण वाक्यानि लिखत—** 1 + 1 + 1 + 1 + 1 = 5

(i) मम ............ उभयत: उद्यानम् अस्ति। (विद्यालय:)

(ii) ............ बहि: एक तरणताल: अस्ति। (उद्यानम्)

(iii) अहम् ............ सह तरणताले तरामि। (मित्र:)

(iv) अस्माकं मित्रेषु रमेश: ............ कुशल: अस्ति। (तरण:)

(v) अस्माकं ............ परित: वृक्षा: सन्ति। (ग्रामम्)

**9. प्रदत्तविकल्पेभ्य: उचितानि उत्तराणि चित्वा लिखत—** 1 + 1 + 1 + 1 + 1 + 1 = 6

(i) अहम् प्रात: .................. उद्यानं गच्छामि। (भ्रम् + तुमुन्)

(अ) भ्रमीतुम् (ब) भ्रमतुम् (स) भ्रमितुम् (द) भ्रमीतुम

(ii) छात्र: उद्याने .................... अधुना पठति। (क्रीड् + क्त्वा)

(अ) क्रीडत्वा (ब) क्रीडीत्वा (स) क्रडीत्वा (द) क्रीडित्वा

(iii) छात्रा: गुरुं .................. पाठं पठन्ति। (प्र + नम् + ल्यप्)

(अ) प्रनम्य (ब) प्रणमय (स) प्रणम्य (द) प्रनमय

(iv) बालक: ................. पादकन्दुकेन खेलति। (धाव् + क्त्वा)

(अ) धावत्वा (ब) धावतवा (स) धावीत्वा (द) धावित्वा

(v) रमा भोजनं खादित्वा भ्रमति।

(अ) खाद + क्त्वा (ब) खाद् + क्त (स) खाद् + क्त्वा (द) खाद् + त्वा

(vi) सुकन्या आपणं गम् + तुमुन् द्विचक्रिकाम् आरोहति।

(अ) गमितुम् (ब) गमतुम् (स) गन्तुम् (द) गमितुम्

## खण्ड: (घ)

### पठित-अवबोधनम् (35 अङ्का:)

**10. अधोलिखित गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृते उत्तरपुस्तिकायाम् लिखत—** 5

न अदेशे, न अकाले, न कुत्सयन्, न प्रतिकूलोपहितम्, न पर्युषितम् अन्नम् खादेत्। न नक्तं दधि भुञ्जीत। न कञ्चिद् अवजानीयात्। न वेगान् धारयेत्। न अहंमानी स्यात्। न अभृतभृत्यो, नैक: सुखी, न सर्वविश्रम्भी न सर्वाभिशंकी स्यात्। न नियमं भिन्द्यात्।

**I. एकपदेन उत्तरत—** ½ + ½ = 1

(i) नक्तं किं न भुञ्जीत ?

(ii) कीदृशम् अन्नं न खादेत् ? **(मूल्यपरक: प्रश्न:)**

LearnCBSE.in

**II. पूर्णवाक्येन उत्तरत—** 2

'चरकसंहिता' इति ग्रन्थस्य रचयिता कः ?

**III. निर्देशानुसारम् उत्तरत—** 1 + 1 = 2

(i) 'स्यात्' इति कस्य लकारस्य रूपम् अस्ति ?

(अ) लट्लकारस्य (ब) लृट्लकारस्य

(स) विधिलिङ्गलकारस्य (द) लोट्लकारस्य

(ii) 'अदेशे' इति कस्याः विभक्तेः रूपम् अस्ति ?

(अ) सप्तमी विभक्तेः (ब) पञ्चमी विभक्तेः

(स) प्रथमा विभक्तेः (द) चतुर्थी विभक्तेः **(मूल्यपरकः प्रश्नः)**

**11. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन उत्तरपुस्तिकायां लिखत—** 5

**भवन्ति नम्रास्तरवः फलोद्गमैः नवाम्बुभिर्भूरि विलम्बिनो घनाः।**
**अनुद्धताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्।।**

**I. एकपदेन उत्तरत—** ½ + ½ = 1

(i) फलोद्गमैः के नम्राः भवन्ति ?

(ii) परोपकारिणं स्वभावः कीदृशः भवति ?

**II. पूर्णवाक्येन उत्तरत—** 2

घनाः कथं भूरिविलम्बिनो भवन्ति ?

**III. निर्देशानुसारम् उत्तरत-** 1 + 1 = 2

(i) 'अनुद्धताः' कस्य विशेषणम् ?

(अ) समृद्धिभिः (ब) तरवः

(स) घनाः (द) सत्पुरुषाः

(ii) 'भवन्ति नम्रास्तरवः फलोद्गमैः' अस्मिन् वाक्ये 'भवन्ति' पदस्य कर्तृपदं किम् ?

(अ) घनाः (ब) तरवः

(स) सत्पुरुषाः (द) परोपकारिणाम्

**12. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत—** 5

आचार्यः — छात्राः! पश्यत एतत् चित्रम्। अत्र त्रयः जनाः स्थिताः। ते के सन्ति ?

सुरभिता — आचार्य! अहं मन्ये एते तु रामः लक्ष्मणः सीता च।

आचार्यः — शोभनम्! कोऽयम् उपविष्टः ?

लतिका — अयं ननु भरतः यतः अस्य हस्ते पादुके स्तः

आचार्यः — किं करोति भरतः पादुकं गृहीत्वा ?

लतिका — यदा रामः वनं गतः तदा भरतः तं प्रत्यानेतुं गच्छति।

**प्रश्ना :**

**I. एकपदेन उत्तरत।** ½ + ½ = 1

(i) चित्रे कति जनाः स्थिताः ?

(ii) कस्य हस्ते पादुके स्तः ?

**II. पूर्णवाक्येन उत्तरत।** 2

चित्रे के के जनाः सन्ति ?

**III. उचितम् उत्तरं चित्वा लिखत।** 1 + 1 = 2

(i) भरतः कं प्रत्यानेतुं गच्छति ?

(अ) लक्ष्मणं (ब) रामं (स) सीतां (द) छात्रम्

LearnCBSE.in

(ii) 'गृहीत्वा' इति पदे क: प्रत्यय: प्रयुक्त: ?

(अ) ल्यप् (ब) तुमुन् (स) शतृ (द) क्त्वा

**13. अधोलिखितपंक्त्यो: उचितं भावार्थं चित्वा उत्तरपुस्तिकायां लिखत—** **1 + 1 + 1 + 1 = 4**

**(i) पयोधीनामध: स्थिति:।**

(1) पयोधीनाम् स्थिति: उच्चै: न भवति।

(2) पयोधीनाम् स्थिति: नीचै: न भवति।

(3) सागरा: जलस्य ग्रहणेन अध: भवन्ति।

**(ii) गुणलुब्धा: स्वयमेव सम्पद:।**

(1) सम्पद: तु गुणै: आकृष्टा: भवन्ति।

(2) सम्पद: तु लुब्धा: भवन्ति।

(3) नरा: सम्पद: लोभिन: भवन्ति।

**(iii) रूपयौवनसम्पन्ना विशालकुलसम्भवा।**

(1) मनुष्यस्य जन्म कामम् उच्चकुले भवेत्। स: रूपयौवनसम्पन्न: अपि स्यात्।

(2) य: जन: यौवनसम्पन्न: भवति, स: उच्चकुले भवेत्।

(3) य: जन, रूपसम्पन्न: भवति, स: निम्नकुले भवेत्।

**(iv) गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।**

(1) य: नर: गौरवं प्राप्यते स: धनस्य सञ्चयं करोति।

(2) वित्तस्य संग्रहेण नर: गौरवं प्राप्यते।

(3) नर: दानात् एव गौरवं प्राप्नोति। य: धनस्य सञ्चयमेव करोति तस्य महत्वं नास्ति।

**14. अधोलिखितपद्यद्वयस्य अन्वययो: रिक्तस्थानानि पूरयित्वा पुन: लिखत—** **½+½+½+½+½+½+½+½ = 4**

**(क) स्वस्थवृत्तं यथोद्दिष्टं य: सम्यगनुतिष्ठति।**
**स समा: शतमव्याधिरायुषा न वियुज्यते।।**

**अन्वय:—**य: यथोद्दिष्टम् ____(i)____ सम्यक् ____(ii)____ स: ____(iii)____ समा: अव्याधि: ____(iv)____ न वियुज्यते।

**(ख) भवन्ति नम्रास्तरव: फलोद्गमै: नवाम्बुभिर्भूरिविलम्बिनो घना:।**
**अनुद्धता: सत्पुरुषा: समृद्धिभि: स्वभाव एवैष परोपकारिणाम्।।**

**अन्वय:—**तरव: ____(v)____ नम्रा: भवन्ति, ____(vi)____ घना: भूरिविलम्बिन: (भवन्ति) सत्पुरुषा: ____(vii)____ अनुद्धता: (भवन्ति), परोपकारिणाम् एष: एव ____(viii)____ भवति।

**15. अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत—** **1 + 1 + 1 + 1 = 4**

(i) ब्राह्मण: राज्ञा श्राद्धार्थम् निमन्त्रित:।

(ii) दधि नक्तम् न भुञ्जीत।

(iii) आरुणे: पुत्र: श्वेतकेतु: आसीत्।

(iv) एवं गुरु: अयम्।

**16. घटनाक्रमानुसारम् अधोलिखितानि वाक्यानि क्रमेण पुन: लिखत—** **½+½+½+½+½+½+½+½ = 4**

(i) राजा निजपुत्रान् नीतिशास्त्रोपदेशाय विष्णुशर्मण: करे समर्पितवान्।

(ii) विष्णुशर्मण: महापण्डित: आसीत्।

(iii) स: अचिन्तयत् यत् मे पुत्रा: विद्याहीना: न शोभन्ते।

(iv) देवम् आलस्यं च विहाय पुरुषार्थ: विधेय: इति चिन्तयित्वा राजा पण्डितसभां कारितवान्।

LearnCBSE.in

(v) भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् आसीत्।

(vi) तस्य पुत्रा: उन्मार्गगामिन: अनधिगत शास्त्रा: च आसन्।

(vii) राजा स्वपुत्राणाम् आचारहीनतया उद्विग्नमन: आसीत्।

(viii) तत्र सुदर्शन: नाम सर्व सर्वगुणोपेत: राजा आसीत्।

**17. (अ) अधोलिखितवाक्येषु रेखांकितपदानां कृते उचितम् अर्थं चित्वा लिखत—** **1 + 1 = 2**

(i) ब्राह्मण: परम् विषादम् अगच्छत्।

(अ) चिन्ताम् (ब) दु:खम् (स) अपमानम् (द) इच्छाम्

(ii) सर्वस्य लोचनं शास्त्रम्।

(अ) मुखम् (ब) पदम् (स) श्रोत्रम् (द) नेत्रम्

**(आ) अधोलिखितेषु अर्थमेलनं कुरुत—** **½ + ½ + ½ + ½ = 2**

| | |
|---|---|
| (i) परितोष: | (अ) मेघ: |
| (ii) शीलम् | (ब) सन्तोष: |
| (iii) संसर्ग: | (स) आचार: |
| (iv) पयोद: | (द) सङ्ग: |

LearnCBSE.in